International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2022; 8(5): 07-09
© 2022 IJSR
www.anantaajournal.com
Received: 07-05-2022
Accepted: 13-06-2022

**सुप्रीति साहा**
सहकारी अध्यापिका,
शैलजानन्द फाल्गुनी स्मृति महाविद्यालय, खयराशोल, बीरभूम, पश्चिमवंग, भारत

Corresponding Author:
**सुप्रीति साहा**
सहकारी अध्यापिका,
शैलजानन्द फाल्गुनी स्मृति महाविद्यालय, खयराशोल, बीरभूम, पश्चिमवंग, भारत

# महाकविकालिदासस्य रचनाशैल्यां विज्ञानस्य प्रयोगम्-एकं विचारम्

## सुप्रीति साहा

### प्रस्तावना

प्राचीनभारतीयसर्वश्रेष्ठः प्रतिभाधरः कविः कालिदासस्य कविख्याति न केवलं कालोत्तीर्णं देशोत्तीर्णमपि स्यात्। पाश्चात्यपण्डिताः महाकवेः काव्यरससुधां पीत्वा तस्य प्रशंसायां मुग्धम् आसन्। महाकवि स्वरचितं काव्यनाटकस्य विषयवस्तुनि प्राणाः प्रतिष्ठितम् अकरोत्। कालिदास इति नाम्ना वयं न केवलम् एकं व्यक्तित्वं बोधयामः, प्राचीन भारतीयसाहित्यस्य एकं सुवर्णयुगं बोधयामः। यस्मिन् युगस्य संस्कृतेः मूर्तः महाकविकालिदासः।तु दु:खस्य विषयं यत् अपरं साहित्यिकमिव अस्मिन् कवेः देशं कालं जीवनचर्चासम्पर्कितं युक्तियुक्तं कोऽपि प्रामाण्यतथ्यं न प्राप्नोति। भारतवर्षस्य कस्मिन् नगर्यां कस्मिन् काले कालिदासस्य जन्मः अभूत् तत् नीत्वा पण्डिताणां मध्ये कुतूहलस्य अन्तं नास्ति। कवेः नैसर्गिकं प्रतिभा निरलससाधनां तां महाकवेः अभिधायां प्रतिष्ठितम् अकरोत्। श्रुति-स्मृति-छन्द-अलङ्कार-चित्रविद्या-संगीतशास्त्र-राजनीति-ज्योतिष-कामशास्त्र-दर्शन-व्याकरण-लोकचरित्र-भाषावैचित्रं च सर्वक्षेत्रे तस्य वैदग्ध्यम् आसीत्।नाट्यकलायां- संगीतचर्चायां-ज्ञानविज्ञानानुशीलने-चित्रविद्यायां-वीरत्वे-वैभवे च गुप्तयुगः कालिदासं प्राप्त्वा समृद्धतरम् अभवत्।

महाकविकालिदासस्य युगं विज्ञानस्य युगं नासीत्। अतः आधुनिककाले विज्ञानस्य अर्थं तथा द्विसहस्रवत्सरं पूर्वे विज्ञानस्य अर्थं समप्रकारकं नास्ति। तत्कालीनं नरान् निकषा विज्ञानं यत् कश्चित् विषयस्य विशेषं ज्ञानं, न साधारणं ज्ञानम्।मालविकाग्निमित्रम् इति नाटकस्य प्रथमाङ्के राज्ञः संगीतशालायाः विवदमानैः आचार्यैः अभिनयशिक्षादानं यथोपयुक्तं किम्? एतद् निर्धारणाय राजा परिव्राजिका कौशिकीं विचारकासनं गृह्णाय अनुरोधपूर्वकम् उक्तम्-

> "परस्पर विज्ञान संघर्षिणार्भवत्या प्राश्निकपदध्यासनीयम्।"[1]

अत्र विज्ञानशब्दस्यार्थः मल्लिनाथेन उक्तं यत्-ज्ञानविशेषः।तत्कालीनयुगे मनुष्याणां साम्प्रतिकविषयाणां व्यवहारिकं ज्ञानस्य उन्मेषं किं प्रकारेण अभवत्, महाकवेः काव्यनाटकेषु आभाषं प्राप्नोति।यन्त्राणां प्रचलनम् आरभ्यते स्म। धनीजनस्य धारागृहे एकं यन्त्रम् आसीत्। यस्मात् अन्तर्भागात् चन्दनेन सुवासितम् उदकं धीरं निर्गतम् अभवत्। तापप्रवाहकाले धनीजनाः गृहाभ्यन्तरे प्रस्तरासने शयित्वा इदं जलं पीत्वा शरीरे ग्रीष्मकालीनं तापं प्रशमनं कृत्वा स्वस्तिम् अनुभूतवन्तः।

अधुना वातानुकूलिनं यन्त्रं तस्य उदाहरणम्।
मालविकाग्निमित्रस्य द्वितीयाङ्के 'वारियन्त्रस्य'उल्लेखं प्राप्णोति। अनेन यन्त्रेण वैज्ञानिकाः राजानं कृते मध्याह्नभोजनकालम् उपस्थितम् एतद् वोधयितुम् उक्तं यत्-"विन्दुक्षेपात् पिपासु परिसरति शिखा भ्रान्तिमद्वारियन्त्रम्।"[2] अत्र 'यन्त्र' इति शव्दं लक्ष्यणीयम्। तदानीन्तनकाले जनाः नलकूपात् निर्गतं जलमिव स्वच्छं परिश्रुतं जलं नाप्नोत् एतद् सर्व्वेण विदितम्। परन्तु तदा आविलजलं परिशुद्धाय कौशलं तान् निकषा स्पष्टमासीत्। 'मालविकाग्निमित्रम्' इति नाटके "विदुषकम् उक्तम्- मन्देऽप्यमन्दतामेति संसर्गेन विपश्चितः।

पङ्काच्छिद फलस्येव निकषेणाविलं पयः।"[3]

अर्थात् आविलम् उदकं यत् पङ्कच्छिदफलस्य घर्षणेन निर्मलं भवति तदनुरूपं मूर्खमपि विद्वत्जनस्य संसर्गेन वुद्धिमानः भवति।
पङ्कच्छिदं फलं किम्? अधुना तद् वोधाय न कोऽपि उपायं नास्ति। कश्चित् उच्यते एतद् निर्मलीफलं, कतकी फलं वा।
दिककालञ्च निर्धारणाय तत्काले कश्चित् कश्चित् राजा दिकनिर्देशकं प्रासादं निर्माणम् अकरोत्। साधारणतः यं 'मानमन्दिरम्'इति कथ्यते।
'शकुन्तला' इति नाटकस्य नायकः राजा दुष्यन्तः 'मेघछन्दम्' इति नामकं दिगवलोकनं प्रासादमन्दिरस्य एकस्थाने वृहत् वृत्ताकारं इष्टकनिर्म्मितं स्थपतिं प्रतिष्ठितम् अकरोत्। तस्मिन् अल्पा संख्यका अलिखत्,यस्योपरि सूर्यरश्मिः यदा अपतत् तत्क्षात् दिवसस्य समयनिर्णयं सम्भवम् अभवत्।
तदा क्षुद्रं क्षुद्रं नदीनालिकायाः उपरि सेतुनिर्माणस्य पद्धतिम् आसीत्। न केवलमेतद् अतिविशालं नदीम् उत्तीर्णाय राजानः यत्र नद्याः जलं तथा स्रोतं च स्वल्पम् अस्ति तत्र अतिकायहस्तिसहयोगेन गजसेतुं निर्माणं कृत्वा अनेन सैन्याः अश्वरथञ्च नीत्वा जलभागं पारापारम् अकुर्वन्। वीरवररघुः दिग्विजयकाले वङ्गप्रदेशात् उड़ीसां प्रति गमनकाले-"स तीर्त्वा कपिशां सैन्ये उद्धद्विरद् सेतुभिः।"[4] भारतवर्षः व्यतिरिक्तं कोऽपि अन्यप्रदेशे अयम् अनिर्वचनीयं गजसेतुं निर्माणस्य कौशलं न दृश्यते। न केवलं राजा रघुः,तस्य पौत्रः राजा दशरथः,दशरथस्य पौत्रः कुशः कुशवतीः च नगरं परित्यज्य तेषां राजधान्याम् अयोध्यायाम् आगमनकाले—"तीर्थे तदीये गजसेतु वन्धात् प्रतीप गामुत्तर तोऽस्य गङ्गाम्"।[5] उत्तरप्रवाहिनीं गङंगानद्यां सः गजसेतुं निर्माणं कृत्वा ससैन्यं अतिक्रमम् अकरोत्।
तत्काले अस्माकं देशस्य जनाः यत् नैपुण्यतासहयोगेन जलयानं निर्माणे सक्षमम् अभवत् तत् किञ्चित् प्रमाणं महाकवेर्साहित्ये प्राप्णोति।'अभिज्ञानशकुन्तलम्' इति नाटकस्य षष्ठाङ्के 'समुद्रव्यवहारिसार्थोवाहोधनमित्रः'अस्य उल्लेखम् अस्ति। यस्स अर्थः धनमित्रनामः समुद्रपथि गमनागमनकारी एकः वणिजः यैः जलयानैः वणिजः वाणिज्यम् अकुर्वन्,तानि अस्माकं देशे निर्मितम् अभवत्,तस्मिन् विषयि न कोऽपि सन्देहमस्ति।
रधुवंशस्य चतुर्थसर्गे युद्धनौकायाः उल्लेखं प्राप्णोति। रघुः दिग्विजयं प्रति निर्गतं भूत्वा वङ्गदेशम् आक्रमणार्थम् आगच्छति एतद् श्रुत्वा वङ्गदेशस्य योद्धाः तं वारणार्थं गङ्गावक्षे अनेकाः युद्धनौकाः स्थापयन्ति स्म। अनेन वोधगम्यते यत् तस्मिन् काले वङ्गदेशस्य निर्माणकाराः युद्धनौका अपि निर्मितम् अकरोत्। अवश्यं वर्तमानसमये प्रस्तुतं युद्धनौकया सह पूर्वे निर्मितम् युद्धनौकायाः पार्थक्यं विवेचनां च निर्वुद्धिता स्वरूपम् इति। तथापि सामान्यां नौकां सदृशं रणपोतं नास्ति। तन्मध्ये विशेषत्वं विद्यते स्म। तत् नीत्वा न कोऽपि सन्देहम् अस्ति।
तस्मिन् युगे कश्चित् भ्रान्तरं प्रस्तरं—"कृत्रिम राग योजित"अर्थात् कृत्रिमं वर्णेन रञ्जितं कृत्वा चुनी पान्ना च आदि महामूल्यं रत्नरूपे विक्रयस्य चेष्टाम् अपि अकरोत्।
महाकविकालिदासेन विरचितं विक्रमोर्वशीयम् नाटकेऽपि विज्ञानसभ्यतायाः चिह्नं विद्यमानम्।महाकविकालीदासस्य अधिके काव्ये नाटके महाकाशयानं भ्रमणस्य वहवः विवरणाः प्राप्णोति। 'विक्रमोर्वशीयम्' नाटके वयं पश्यामः द्वे अप्सरे उर्वशी चित्रलेखा च तयोः स्वाकाशयाने आरोहणं करोति। चालिका स्थाने उर्वशी उपविशति। महाकवि अत्र मञ्चं निर्देशति यत्---"ततः प्रविशति आकाशयानेन उर्वशी चित्रलेखा च"।[6] अस्माकं अन्तरे प्रश्नं सञ्जायते यत् रङ्गमञ्चे किं रूपम् आकारस्य प्रकारस्य च आकाशयानम् उपस्थितम् अभवत्। विशेषमुल्लिख्यम् अस्मिन् नाटके यत् विज्ञानस्य अग्रगतिरूपम् आकाशयानस्य वर्णनाम् अस्ति तदनुरूपं नारीणां दूर्वारं स्वाधीनतां दृष्ट्वा वयम् अभिभूतं भवति। अतः एका नारी आकाशयानं चालयति।अनेन तस्मिन् युगेऽपि नारीणाम् अत्याश्चर्यं दक्षतायाः परिचयं प्राप्णोति।
महाकविकालिदासः तस्य रचनाशैल्यां यत् विज्ञानस्य प्रभावं स्थापयति तस्य प्रमाणं 'मेघदूतम्' इति काव्यस्य मध्येऽपि दृश्यते। यक्षस्य करूणहृदयं तथा प्रेमधर्मीहृदयम् आश्वस्तं करनार्थं,यक्षपत्न्या सह आत्मिकसंयोगस्थापनाय च मेघं दूतवेशेन प्रेरयति रामगिरिपर्वतात् अलकापुरीं पर्यन्तम्।सः मेघरूपस्य मध्ये सौन्दर्यं रहस्यं विस्मयं कल्याणं च सर्वम् अपश्यत्। एकं मेघं कश्चिदेक मङ्गलमयदिवसे कवेः कल्पनायाः वाहनम् अभूत्। अनेन मेघदूतस्य प्रेममयदृश्यस्य सृष्टिर्भवति। परन्तु मेघस्य जन्मनः पश्चात् विद्यते यत् भौगोलिकतथ्यस्य एका शुभ्रा वार्ता तुहिनकिरणपुत्रः। अतः अत्र वयं भूगोलशास्त्रेण सह विज्ञानस्य योगसूत्रं पश्यन्ति। अधुना प्रजन्मे शिक्षाक्षेत्रे भूगोलशास्त्रं विज्ञानाभिधायां भूषितं करोति। मेघप्रसङ्गे 'मेघदूतम्'काव्यस्य पूर्वमेघे आदौ

कामार्तः यक्षः मेघं तुष्टं करणाय उक्म्----

“जातं वंशे भुवनविदिते पुष्करावर्तकानां
जानामि त्वां प्रकृतिपुरूषं कामरूपं मघोनः।
तेनार्थित्वं त्वयि विधिवशाद्दुरवन्धुर्गतोऽहं
याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा।“[7]

चिकित्साविज्ञानेऽपि अस्य देशस्य जनाः साफल्यार्जनम् अकुर्वन्। तस्य प्रमाणं महाकवेर्साहित्ये प्राप्णोति। ‘मालविकाग्निमित्रम्’इति नाटके सर्पदंशनस्य वैज्ञानिकचिकित्साविधेर्वरणं दृश्यते। वर्णितविषयमन्तरे विज्ञानस्य व्यवहारं दृष्ट्वा वयम् अभिभूतं भवामः। अतः अनायासेन अनुमीयते यत् साम्प्रतंकाले विज्ञानस्य यत् प्रयोगं वयं पश्यामः,तत् संस्कृतसाहित्यस्य मध्यि वहुवत्सरं पूर्वे आलोचितम् अभवत्।
विज्ञानः मनुष्यस्य जीवने आशीर्वादस्वरूपः।विज्ञानस्य जयध्वजा मनुष्यस्य जीवनं गतिमयं करोति। आधुनिकं जीवनं शनैः शनैः प्रगत्याः पथि प्रवेशाय विज्ञानं प्रधानम् अवलम्बनम्। वहु वत्सरं पूर्वात् अस्मिन् अभियानस्य प्रारम्भकालः।अयं विज्ञानं नीत्वा वहूनि साहित्यानि अरोचयत्।वर्तमानेऽपि तस्य दूर्वारं गतिं प्रवहति। अनेकानां विश्वख्यातानां मनिषीनां वयं जानामः। अनया संस्कृतसाहित्येऽपि विज्ञानस्य प्रयोगं विद्यमानम्। तत् क्षेत्रे याः कवयः विज्ञानस्य विषयवस्तुनि साहित्येन प्रकाशयति तेषां सर्वाग्रे महाकविकालिदासस्य नामः अग्रगण्यः स्मरणीयः च। तस्य अधिकं रचनायाः विज्ञानविषयचर्चाम् अस्माभिः उपलब्धुं शक्यते। अनेन महाकविकालिदासस्य विज्ञानमयम् अन्तरस्य परिचयं प्राप्णोति।

## पादटीका

1. कालिदास प्रतिभा, 423
2. कालिदास प्रतिभा, 423
3. मालविकाग्निमित्रम्, द्वितीयाङ्कः
4. रघुवंशम्, 4, 38
5. कालिदास प्रतिभा, 425
6. कालिदास प्रतिभा, 335
7. मेघदूत परिचय, 6, 13

## ग्रन्थपञ्जी

1. मल्लिक रघुनाथः, कालिदास प्रतिभा, मे.इउ एन धर एण्ड सन्स प्रा. लि.कलकाता 12
2. भट्टाचार्य पार्वती चरण,मेघदूत परिचय,संस्कृत पुस्तक भाण्डार, कलकाता-6
3. चक्रवर्ती सत्यनारायण, अभिज्ञानशकुन्तलम्, संस्कृत पुस्तक भाण्डार, कलकाता-6
4. काले. एम. आर, विक्रमोर्वशीय, एकादश संस्करण, मोतीलाल वनारसी दास, दिल्ली, 1961
5. ड. दास देवकुमार,सं स्कृत साहित्येर इतिहास,श्री वलराम प्रकाशनी, कलकाता-6
भट्टाचार्य ड.विमानचन्द्र, संस्कृत साहित्येर रूपरेखा, वुक ओयार्लड, कलकाता-9